Gyanshauryam, International Scientific Refereed Research Journal
© 2019 GISRRJ | Volume 2 | Issue 2 | ISSN : 2582-0095

# स्वातन्त्र्योत्तरकाले यौतकाधिनियमाः महिलानां स्थितिश्च



लक्ष्मीनारायण जेना
शोधच्छात्रः, शिक्षाशास्त्रम्
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, भारतम्

**शोधसारः-** यौतकपीडया पीडिताः बह्वः महिलाः साम्प्रतिकसमाजे अत्महत्यादि नृसंशकार्यादिकं कुर्वन्ति । यद्यपि साम्प्रतिककाले शिक्षिताः सर्वत्र दरीदृश्यन्ते, तथापि एतादृशयौतकरूपरोगेण पीडिताः अपि दृश्यन्ते इत्यतः स्वातन्त्र्योत्तरकाले नारीणां कृते यौतकगताधिनियमाः तथैव तेषां स्थितिः पत्रेऽस्मिन् विस्तरेण विचार्यते ।

**मुख्य शब्दः** – स्वातन्त्र्योत्तरकालः, यौतकाधिनियमः, महिला, भारतदेशः, अम्बेद्कर् महाभागः।

१९४७ वर्षे अगस्ट् मासस्य पञ्चदशे दिनाङ्के भारतदेशः स्वतन्त्रो जातः । भारतसंविधानस्य अन्वयः अभवत् १९५० तमे वर्षे जनवरीमासस्य षड्विंशतिः दिनाङ्के । डा बि आर् अम्बेद्कर् महाभागः महिलानां कृते शिक्षणाधिकारम्, तासाम् उन्नत्यर्थं Hindu code bill सज्जीकृतवान् । एतत् तु विशेषेण महिलासम्बन्धि एव वर्तते । किन्तु, साम्प्रदायिकाः, सम्प्रदायवादिनः च संसदि एतत् तिरस्कृतवन्तः । १९५१ तमे वर्षे अम्बेद्कर् महाभागः स्ववृत्तेः त्यागपत्रं दत्तवान् । Hindu code bill मध्ये भारतीयमहिलासम्बन्धि तासाम् उन्नतिदृष्ट्या अनेके नियमाः अधिनियमाः सूचिताः । तत्र हिन्दू, मुस्लिम्, ख्रिष्टियन्, पार्सी महिलासम्बन्धि अधिनियमाः उल्लिखिताः आसन् ।

केन्द्रसर्वकारेण स्वातन्त्र्योत्तरकाले महिलानां रक्षणं मनसिकृत्वा भारतीयसंविधानस्य अन्तर्गततया बहवो अधिनियमाः सूचिताः । ते च एवं विद्यन्ते –

१. The Hindu marriage Act 1955
२. The Hindu adoptions &maintenance Act 1956
३. The Hindu succession Act 1956
४. The Special Marriage Act 1954
५. The Dowry prohibition Act 1961
६. The Medical termination of Pregnancy Act 1971
७. Industrial Disputes Act 1947
८. The Factories Act, 1948 and relevant provisions for women.
९. Relevant provisions of the mines Act 1952 for women.

१०. The Maternity benefit Act 1961

११. The Indecent representation of women(prohibition) Act 1986

१२. The Immoral traffic (prevention) Act 1956.

१३. The Muslim women ( protection of right on divorce) Act 1986

१४. The Family courts Act 1984.

१५. The National commission for women Act 1990.

१६. The Commission of sati (prevention) Act 1987.

१७. The Human Rights Act 1993.

१८. The Constitutional law of India 1950.

१९. Indian evidence Act.

२०. Indian penal code.

२१. Criminal Procedure code.

**British Acts –**

ब्रिटीश् जनानां काले महिलानां हितं मनसिकृत्य केचन अधिनियमाः आगताः । ते च –

- **Summary Jurisdiction (Married women) Act 1985**

अनुच्छेदः ४ प्रविभागस्य अधः उद्देशपूर्वकमेव पत्न्याः पुत्रस्य /पुत्र्याः संरक्षणं पतेः दायित्वं भवति । यदि पतिः पञ्चसु परिस्थितिषु तस्य पत्न्याःपुत्राणां पुत्रीणां वा हानिं जनयति तर्हि पत्नी साक्षात् न्यायं याचयितुं न्यायालयं गन्तुमर्हति । ताः च परिस्थितयः – (क) तर्जनम् (ख) ताडनम् (ग) अन्यं वरयितुं प्रचोदनं (घ) दूरे संस्थापनम् (ङ) मद्यं पीत्वा गृहमागच्छति चेत् । अनन्तरं पत्न्याः उपरि दोषारोपणं करणम् आक्रमणम् इत्यादि क्रियते चेत् पत्युः कारागारशिक्षा भवति मासद्वयं यावत् ।

- **Licensing Act 1902**

अस्मिन् अधिनियमे केचन नियमाः योजिताः । मद्यसेवनस्य दुराभ्यासे, दिनं प्रति मद्यसेवनम् इत्यादि १९२५ तमे वर्षे संयोजिताः । Summary Jurisdiction Act 1925 मध्ये गुह्यरोगेषु विद्यमानेषु संभोगं प्रति आग्रहः, वेश्यावृत्तिं कर्तुम् आग्रहः, नैरन्तर्यं पत्न्याः, पुत्राणां पुत्रीणां कृते क्रूररूपेण हानिकरणम् इत्यादयः योजिताः ।

- **The Maimed women (Maintenance in case of diversion act 1886)**

विधिनियमेऽस्मिन् यदि पतिः उद्देशपूर्वकं पत्न्याः संसारस्य निर्वहणं कर्तुं निराकरोति तर्हि पत्नी न्यायालयं गन्तुमर्हति । यदि सः विवेचनपूर्वकं करोति तर्हि केवलम् ।

- **Poor law amendment act 1868**

अधिनियमेऽस्मिन् अनुच्छेद ३३ प्रविभागान्तर्गततया विधिनियमाधिकारिणः पत्न्याः पक्षतः न्यायं दद्युः । यदा पतिः स्वपत्न्याः निर्वहणं कर्तुं विफलो भवति ।

- **Summary jurisdiction (separation and maintenance Act 1925**

अयं तु विधिनियमः १८९५ Summary jurisdiction विधिनियमस्य अर्हतां निवारयति । यथा पत्नी पतिं विनापि जीवितुम् इच्छति (यदा पतिः तस्याः निर्वहणं कर्तुं नेच्छति), पत्न्याः कृते न्यायप्रदानमित्यादि ।

**Post Independent Indian government Act on Dowry**

स्वातन्त्र्योत्तरकाले भारतसर्वकारेण यौतकसम्बन्धि यौतुकशोषणा, यौतकात् मरणम् इत्येवं सर्वं मनसि कृत्वा केचन विधिनियमाः आनीताः । येन च समाजे एतद्विषये जागर्या, महिलायाः च रक्षणं भवतीति ।

यद्यपि अधिनियमः १९६१ तमे वर्षे आगतः परं यौतकस्य अभ्यासः तु बहोः कालादेव समाजे अवर्तत । अपराधानां संख्या तु अधिका एव आसीत् । भारतीयसंसत् एतद्विषयं सगम्भीरं विचिन्त्य एका समितिं रचितवान् । तस्याः समितेः प्रमुखः आसीत् कृष्णसागरः । अधिनियमेषु न्यूनताः दृष्ट्वा परिशील्य च परिवर्तनार्थं केचन विषयाः सूचिताः । तदाधारेण संसदि विद्यमानाः सचिवाः अधिनियमान् आनीतवन्तः ।

- **Dowry prohibition Act 1961**

अयम् अधिनियमः यौतकस्य व्याख्यानं करोति । यौतकं नाम सम्पत्तिः अथवा बहुमूल्यं यत्किञ्चित् अथवा प्रत्यक्षेण अप्रत्यक्षेण वा दीयमानं यच्च निर्णीतम् इति । पितृभ्यः अथवा अन्येभ्यः विवाहकाले प्रदीयमानम् अथवा अन्येन केनचित् दीयमानम् इति ।

- अनुच्छेदः ३- वदति यत् यौतकस्य दाने वा स्वीकरणे वा तस्य दण्डः विधीयते ।
- अनुच्छेदः ४- यौतकस्य आग्रहे दण्डं विदधाति ।
- अनुच्छेदः ५ -यौतकस्य प्रदाने स्वीकरणे वा निरर्थकम् इति ।
- अनुच्छेदः ६- यदि यौतकं दीयते तर्हि तत् महिलायाः अथवा तस्याः उत्तराधिकारिणः लाभाय भवेदिति ।
- अनुच्छेदः ७ - यः यौतकदाता भवति तं जागरयति ।
- अनुच्छेदः ८ - निर्दिष्टेषु उद्देशेषु अपराधे कृते तस्य दण्डप्रदानं भवतीति ।
- अनुच्छेदः ८A- वदति यत् यदि कश्चन यौतकं स्वीकरोति तर्हि सः अभियोगार्हः (prosecution) भवति ।
- **Dowry death Section 304 B Indian penal code.**

अनुच्छेद ३०४B IPC प्रविभागः वदति यत् अग्निदाहात्, देहे क्षतादिकम् अथवा विवाहात् अनन्तरं सप्तसु वर्षेषु यदि सा पत्या पीडिता भवति अथवा पत्युः सम्बन्धिभिः यौतकस्य आग्रहः तद्वारा यदि पत्नी मृता भवति तर्हि तत् "यौतकमरणम्" इत्युच्यते । तादृशे सन्दर्भे पतिः तस्याः मरणे कारणम् इति परिगणितं भवति ।

- **Abetment of suicide**

अनुच्छेदः 306 IPC विवृणोति यत् यदि कस्याश्चित् आत्माघातार्थं प्रचोदयति अथवा प्रचोदनरूपी कार्यं करोति , तस्य दण्डः विधीयते । तस्य कारागृहवासः भवति ।

- **Murder –**

( Section 300 & 302 of IPC ) अनुच्छेदः ३०० हननस्य विषये विवरणं ददाति । उद्देशपूर्वकं कञ्चित् / काञ्चित् मारयितुम् अथवा केवलं देहे आघातं जनयितुं गतः तेन मरणम् अभवत् इत्यादि विषयेषु विवरणं ददाति ।

( 302 IPC Punishment of Murder ) यदि कश्चन मारयति तर्हि तस्य मरणम् एव दण्डः अथवा आजीवनं कारागृहे वासः, तेन सा / सः शुल्कमपि दद्यात् ।

( Section 498 A IPC ) पतिः अथवा पत्युः सम्बन्धी कश्चन यदि पत्न्याः कृते हानिं जनयति तर्हि सः दण्ड्यः भविष्यति । तेन सह तस्य कारागृहवासः अपि दीयते ।

**यौतकप्रथायाः निवारणाय सर्वकरपक्षतः स्वीकृताः पदक्षेपाः**

(Steps taken by the central Government to curb the evil of dowry system )

- **Dowry prohibition Act 1961** इति अधिनियमस्य आगमनात् परमपि यौतकप्रथा अधिका एव अभवत् सर्वत्र । इयं च सामाजिकी समस्या । न केवला इयम् अपि तु एतत्समानाः अन्याः सामाजिकव्याधयः याः आसन्, ताः निवारयितुं भारतसर्वकारः कटिबद्धः अभवत् ।
- महिलानां स्थितिविषयकस्य वृत्तान्तानुसारं भारतीयसर्वकारेण सर्वकारीयसेवासु नियमाः संशोधिताः । विशेषेण सर्वकारे कार्यं कुर्वाणेभ्यः प्रत्यक्षेण अप्रत्यक्षेण वा यौतकस्य दाने स्वीकारे वा यौतकसम्बन्धिनियमाः सूचिताः ।
- भारतसर्वकारेण सर्वराज्येभ्यः केन्द्राधिकारप्रदेशेभ्यः च विशेषादेशाः प्रेषिताः । पुनश्च याः विवाहिताः महिलाः अस्याभाविकरीत्या तासां विवाहानन्तरम् आरम्भिकपञ्चसु वर्षेसु मृताः भवन्ति, तद्विषये परीक्षणं करणीयम् इति । विशेषेण देहेल्यां याश्च मृताः महिलाः, ताः सर्वाः अपि यौतकस्य अत्याग्रहात् मृताः इति देहल्याः अपराध-अधिकारिणः तेषाम् इतिवृत्ते अकथयत् ।

**Legal drawbacks and prevention of dowry system**

यौतकस्य नाशनार्थं यौतकान्तर्गततया याश्च मृताः तन्न्यूनीकरणार्थं च अनेके अधिनियमाः आनीताः सर्वकारेण। १९६१ तमे वर्षे सर्वकारः यौतकं विरुध्य दृढसङ्कल्पमकरोत् । अधिनियमानुसारं ये च यौतकं स्वीकर्तारः यौतकप्रदातारः, ये च तदर्थं साहाय्यं कर्तुम् उद्युक्ताः, ते सर्वेऽपि अपराधिन इति परिगण्यन्ते । पञ्चवर्षाणां कारागृहे वासः , पञ्चदशसहस्रं यावत् शुल्कदानम् इति दण्डनमपि आरब्धम् ।

यदि आरम्भिके सप्तवर्षेषु महिला मृता भवति चेत् तदपि यौतककारणात्, तर्हि पत्युः दण्डनं भवत्येव । केषुचित्कारणैः अयम् अधिनियमः न यावत् शक्तियुतः आसीत् ।

- **शासनन्यूनताः**

यौतकधनं यद् निर्दिष्टमस्ति, तत् बहु न्यूनम् । पुनश्च शासकीयव्यवस्थायाम् अधिकारिणः कार्यं सम्यक् न कृतवन्तः । यौतकं तु धनस्य अपेक्षया भिन्नरूपेण दातुम् आरब्धवन्तः जनाः । यथा उपहारः, सुवर्णम् इत्यादि । पुनश्च पुत्र्याः पितुः बहु आग्रहः भवति स्म । अधिनियमे एतत् सर्वमपि अन्तर्गतं नैव आसीत् । सामाजिकगौरवात् पुत्र्याः पितरः अपि न्यायालयं गन्तुमपि न इष्टवन्तः । न्यायालयेषु प्रक्रिया अतीव दीर्घा भवति । कालः बहु गच्छति । कदाचित् आधारः नोपलभ्यते । न्यायव्यवस्थायां शासने च भ्रष्टता दरीदृश्यते येन दुष्टाः दोषरहिताः इति निर्णीयते ।

- **सामाजिकन्यूनताः**

नवदश-विंशतिः शतमाने समाजे बहूनि परिवर्तनानि सञ्जातानि । आधुनिकतायाः आरम्भः अत्यन्तं त्वरितगत्या अभवन् । तस्मात् विलासीजीवनं कर्तुम् आरब्धवन्तः । प्रापञ्चिकेषु विषयेषु आदरभावं दर्शयितुम् उत्सुकाः अभुवन् जनाः । तस्मात् यौतकस्यापि आग्रहः अधिको जातः । समाजे यौतकस्य अतीव स्वीकारार्हं जातः । विलासीजीवनम्, धनस्य गौरवः,

उच्चस्तरीयजीवनम् इत्यादयः समाजस्य मौल्यस्थानमलङ्कृताः। यौतकस्य दानं स्वीकृतिः च समाजे गौरवस्य विषयः अभवत्। यदि युवकस्य पितरः यौतकं स्वीकर्तुं न इच्छन्ति तर्हि तत् अवमाननमिव, तच्च न्यूनता इति परिगणनं कुर्वन्ति स्म।

युवतेः पितरः स्वपुत्र्याः सुखम् इच्छन्तः यदि योग्यो वरः लभ्यते एवञ्च सः आर्थिकदृष्ट्या उत्तमः चेत् तर्हि यौतकं दत्त्वा स्वपुत्र्याः रक्षणं करोतु इति पृच्छन्ति। तासां शिक्षणापेक्षया यौतकप्रक्रियायामेव आसक्तिः अधिकाभवत्। कन्याः अपि तथैव वर्धितवन्तः, येन ताः विवाहः, पतिः, पुत्राः जीवनम् इत्येव चिन्तनं कर्तुम् आरब्धवत्यः। सापि कन्या विश्वासं कर्तुम् आरब्धवती यत् स्वस्याः पितरः अधिकाधिकं सुखं दापयन्ति इति।

**१.७.९ परिहारोपायाः –**

सर्वमेतत् मनसि निधाय यौतकस्य मूलभूतकारणानि ज्ञात्वा यौतकात् रक्षणं तस्य निवारणार्थं च उपायाः प्राप्ताः।

- **शासकीयसाहाय्यम्** – अधिनियमेषु यत्र न्यूनताः आसन्, तेषामधिनियमानां त्यागः। अत्यन्तं कठोररूपेण नूतनाधिनियामानां पुनरानयनम्। तेषां च समाजे अनुष्ठानम्। ये च यौतके भागं गृह्णन्ति, तेषां विषये विचारः। एतदतिरिच्य कुटुम्बस्य गौरवः, सामाजिकगौरवः इत्यादीनां विषये अप्रामुख्यत्वम्।
- **सामूहिकान्दोलनानि** – यो कुटुम्बः नूतनविवाहितायाः पीडां ददाति सः च बहिष्कृतः भवेत्। देहली-मुम्बई इत्यादिनगरेषु महिलसंघटनाः यौतकं विरूध्य प्रतिभटनां कुर्युः। जनाः सक्रियाः भूत्वा भागं गृह्णीयुः। जनाः पार्श्वस्थेषु गृहेषु यदि यौतकस्य चर्चा भवति, तर्हि तद्विषये आरक्षकालये वार्तां दद्युः।
- **जनेभ्यो शिक्षणम्** – यौतकस्य विषये जनाः सम्यक् प्रबोधनीयाः। यौतकस्वीकारः इति पापस्य विषयः भवेत्। शालासु छात्राः एतद्विषये बोधनीयाः। नूतनतया विवाहिताः यौतकम् अगृहीत्वा ते सम्मानर्हाः भवन्ति। तेभ्यो सम्माननं करणीयम्।
- **स्वयंनिर्धारः** – प्रत्येकं युवकः युवती च प्रतिज्ञां कुर्यात् यत् यौतकं विना विवाहं करोमि इति।
- **अन्तर्जातीयविवाहः** – अन्तर्जातीयविवाहार्थं प्रोत्साहं दद्युः। समाजे गौरवभावेन अन्तर्जातीयविवाहं जनाः पश्येयुः।
- **महिलाभ्यो शिक्षणम्** – मुख्यतया महिलाभ्यो शिक्षणम् अत्यन्तम् अनिवार्यम्। आर्थिकदृष्ट्या ताः स्वतन्त्राः भवेयुः , अपि च स्वतन्त्राः भवितुं कौशलशिक्षणस्य प्रदानं करणीयम्।
- **मूलभूतपरिवर्तनम्** – मूलभूतपरिवर्तनं प्रवृत्तौ आगच्छेत्। प्रवृत्तिः च यौतकस्य स्वीकारे प्रदाने च। योग्यो वरो नाम आर्थिकदृष्ट्या सबलः इति नार्थः। अपि च युवकाः अपि विलासीजीवनं यापयितुं बहुमूल्यवस्तूनां क्रयणम् इत्यादिं न कुर्युः। अपि तु अवगच्छेयुः ते। यौतकस्य निराकरणपुरस्सरं यदि विवाहिता महिला यौतकात् पीडनम् अनुभवति तर्हि सा विवाहविच्छेदनार्थं प्रेरयेत्।

**परिशीलितग्रन्थसूचिः**

1.The Indian evidence Act – James fitjems – 1872

2.Introductions to the constitutions of India – durga das basu- 1962

3.Defense against dowry cases – Sumit kumar – 2018

4.Dowry prohibition acts